# भाषासूत्रम् – ३

## क्रियापदानि–२

## लट्लकार: (वर्तमानकाल:) आत्मनेपदम्

भाष् (१ आ.प.)

| | ए.व. | द्वि. | ब.व. |
|---|---|---|---|
| प्रथमपुरुष: | भाषते १ | भाषेते २ | भाषन्ते ३ |
| मध्यमपुरुष: | भाषसे ४ | भाषेथे ५ | भाषध्वे ६ |
| उत्तमपुरुष: | भाषे ७ | भाषावहे ८ | भाषामहे ९ |

**आ. प. प्रत्यया:**

| | ए.व. | द्वि. | ब.व. |
|---|---|---|---|
| प्र.पु. | ते १ | इते २ | अन्ते ३ |
| म. पु. | से ४ | इथे ५ | ध्वे ६ |
| उ.पु. | इ ७ | वहे ८ | महे ९ |

क्रियापदसूत्रम् – (मूलधातु: + गणविकरणम्) = धात्वङ्गम् + प्रत्यय: = क्रियापदम्
(आदेश:) (चिह्नम्)

| गण: | विकरणम् | उदाहरणम् |
|---|---|---|
| प्रथम: | अ | भाषते |
| चतुर्थ: | य | युध्यते |
| षष्ठ: | अ | दिशते |
| दशम: | अय | पूजयते |

भाषते = भाष् + अ + ते

भाष् ↓ मूलधातु:
अ ↓ गणविकरणम्
ते ↓ प्रत्यय:

वन्द् (१ आ.प.) = वन्द् + अ = वन्द + ते = वन्दते

युध् (४ आ.प.) = युध् + य = युध्य + ते = युध्यते

दिश् (६ आ.प.) = दिश् +अ = दिश + ते = दिशते

पूज् (१० आ.प.) = पूज् +अय = पूजय + ते = पूजयते

वन्द् १ आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | वन्दते | वन्देते | वन्दन्ते |
| म. पु. | वन्दसे | वन्देथे | वन्दध्वे |
| उ.पु. | वन्दे | वन्दावहे | वन्दामहे |

युध् ४ आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | युध्यते | युध्येते | युध्यन्ते |
| म. पु. | युध्यसे | युध्येथे | युध्यध्वे |
| उ.पु. | युध्ये | युध्यावहे | युध्यामहे |

दिश् ६ आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | दिशते | दिशेते | दिशन्ते |
| म. पु. | दिशसे | दिशेथे | दिशध्वे |
| उ.पु. | दिशे | दिशावहे | दिशामहे |

पूज् १० आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | पूजयते | पूजयेते | पूजयन्ते |
| म. पु. | पूजयसे | पूजयेथे | पूजयध्वे |
| उ.पु. | पूजये | पूजयावहे | पूजयामहे |

कृ आ.प. लट्लकारः

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | कुरुते | कुर्वाते | कुर्वते |
| म. पु. | कुरुषे | कुर्वाथे | कुरुध्वे |
| उ.पु. | कुर्वे | कुर्वहे | कुर्महे |

केचन धातवः परस्मैपदिनः (उदा. गच्छति, पठति), केचन धातवः आत्मनेपदिनः (उदा. वन्दते, भाषते), केषाञ्चन धातूनां परस्मैपदरूपाणि तथा आत्मनेपदरूपाणि अपि भवन्ति अतः ते धातवः उभयपदिनः(उदा.बोधति/बोधते, क्षिपति/क्षिपते दिशति/दिशते, करोति/कुरुते, पूजयति/पूजयते)

## उपसर्गाः ।


चौरः अजां हरति ।


बालकः उद्याने विहरति ।


वीरः शत्रुं प्रहरति ।




'हृ' धातोः एव एतानि रूपाणि ।

- अत्र सम्, आ, वि, प्र, इत्यादयः शब्दांशाः धातोः पूर्वं दृश्यन्ते । एते एव उपसर्गाः ।
- उपसर्गाः २२ सन्ति । (प्र, अप, उप, अव) (परा, आ) (परि, अधि, अपि, अति, वि, अभि, प्रति, नि) (सु, अनु) (सम्, उद्, निस्, निर्, दुस्, दुर्)
- उपसर्गकारणात् कदाचित् धातोः अर्थः परिवर्तते । यथा गच्छति-आगच्छति । वदति-प्रतिवदति ।
- उपसर्गाः कदाचित् धातोः अर्थं पोषयन्ति । यथा शोभते-सुशोभते । लसति-विलसति । राजते-विराजते ।

- उपसर्गकारणतः कदाचित् धातोः पदपरिवर्तनं भवति । यथा जि-जयति किन्तु वि+जि = विजयते (आ.प.), स्था-तिष्ठति किन्तु प्र+ स्था = प्रतिष्ठते (आ.प.), गम्- गच्छति किन्तु सम्+ गम् = सङ्गच्छते(आ.प.), रम्-रमते किन्तु वि + रम् = विरमति (प.प.)

## भाषाभ्यासः

### १. योग्यम् उपसर्गं योजयत ।

प्र/सम्/वि/परि/अव/आ/अप

१. चौरः धनम् ____ हरति ।
२. भूपः शत्रुं ____ हरति ।
३. वैद्य रोगं ____ हरति ।
४. बालकः उद्याने ____ हरति ।
५. देवी राक्षसं ____ हरति ।
६. जनः पर्वतम् ____ रोहति ।
७. बालिका पर्वतात् ____ रोहति ।

### २. उपसर्गसहितं क्रियापदं लिखत वाक्यं च पूरयत ।

१. माता आपणात् _____ । (आ+गम्-गच्छ्)
२. बालकः देवं ________ । (प्र+नम्)
३. सेविका जलम् ________ । (आ+नी-नय्)
४. रजकः वस्त्राणि _____ । (प्र+क्षल्-क्षाल्)
५. आचार्यः विद्यालयात् ________ (निर्+गम्)
६. शिक्षकः समस्यां________। (परि+हृ-हर्)
७. वानरः वृक्षात् ________ । (उत्+पत्)
८. बालः जननीम् ________ । (अनु+सृ-सर्)

### ३. उपसर्गसहित-गम् धातोः अर्थं जानीत, स्वभाषया लिखत, वाक्ये प्रयोगं कुरुत च ।




## नामानि - २

**'इ' कारान्तं पुंलिङ्गं नाम 'कवि' (कवि = क् + अ + व् + इ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| कविः | कवी | कवयः | **प्रथमा** |
| कविम् | कवी | कवीन् | **द्वितीया** |
| कविना | कविभ्याम् | कविभिः | **तृतीया** |
| कवये | कविभ्याम् | कविभ्यः | **चतुर्थी** |
| कवेः | कविभ्याम् | कविभ्यः | **पञ्चमी** |
| कवेः | कव्योः | कवीनाम् | **षष्ठी** |
| कवौ | कव्योः | कविषु | **सप्तमी** |
| हे कवे | हे कवी | हे कवयः | **सम्बोधनम्** |

कविसदृशाः अन्ये इकारान्ताः पुंलिङ्गशब्दाः-
मुनि, ऋषि, रवि, हरि, पाणि, यति, मारुति, भूपति, कपि, अलि, गिरि, अरि, वह्नि, मणि इत्यादयः ।

‘इ’कारान्तं स्त्रीलिङ्गं नाम मति (मति = म् + अ + त् + इ)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| मतिः | मती | मतयः | **प्रथमा** |
| मतिम् | मती | मतीः | **द्वितीया** |
| मत्या | मतिभ्याम् | मतिभिः | **तृतीया** |
| मतये/मत्यै | मतिभ्याम् | मतिभ्यः | **चतुर्थी** |
| मतेः/मत्याः | मतिभ्याम् | मतिभ्यः | **पञ्चमी** |
| मतेः/मत्याः | मत्योः | मतीनाम् | **षष्ठी** |
| मतौ/मत्याम् | मत्योः | मतिषु | **सप्तमी** |
| हे मते | हे मती | हे मतयः | **सम्बोधनम्** |

मतिसदृशाः अन्ये शब्दाः– भूमि, बुद्धि, प्रीति, कीर्ति, श्रुति, स्मृति, रुचि, शक्ति, धृति, ओषधि, वनस्पति इ.

‘इ’कारान्तं नपुंसकलिङ्गं नाम वारि (वारि = व् + आ + र् + इ)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| वारि | वारिणी | वारीणि | **प्रथमा** |
| वारि | वारिणी | वारीणि | **द्वितीया** |
| वारिणा | वारिभ्याम् | वारिभिः | **तृतीया** |
| वारिणे | वारिभ्याम् | वारिभ्यः | **चतुर्थी** |
| वारिणः | वारिभ्याम् | वारिभ्यः | **पञ्चमी** |
| वारिणः | वारिणोः | वारीणाम् | **षष्ठी** |
| वारिणि | वारिणोः | वारिषु | **सप्तमी** |
| हे वारे, हे वारि | हे वारिणी | हे वारीणि | **सम्बोधनम्** |

वारिसदृशाः अन्ये शब्दाः– शुचि, सुरभि, भूरि इत्यादयः ।

‘ई’कारान्तं स्त्रीलिङ्गं नाम नदी (नदी = न् + अ + द् + ई)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| नदी | नद्यौ | नद्यः | **प्रथमा** |
| नदीम् | नद्यौ | नदीः | **द्वितीया** |
| नद्या | नदीभ्याम् | नदीभिः | **तृतीया** |
| नद्यै | नदीभ्याम् | नदीभ्यः | **चतुर्थी** |
| नद्याः | नदीभ्याम् | नदीभ्यः | **पञ्चमी** |
| नद्याः | नद्योः | नदीनाम् | **षष्ठी** |
| नद्याम् | नद्योः | नदीषु | **सप्तमी** |
| हे नदि | हे नद्यौ | हे नद्यः | **सम्बोधनम्** |

नदीसदृशाः अन्ये शब्दाः– जननी, कूपी, नारी, युवती, नगरी, मही, वापी, लेखनी, अङ्गनी, सम्मार्जनी, रुक्मिणी, घटी, नखकृन्तनी, सरस्वती, स्थाली, दासी इत्यादयः ।

# विशेषणम्



एषः बालकः । एतस्य नाम अजयः ।
अजयः उत्तमः बालकः ।
अजयः स्वस्थः कार्यतत्परः च बालकः ।

अत्र उत्तमः, चतुरः, स्वस्थः, कार्यतत्परः एते शब्दाः अजयः कीदृशः अस्ति इति कथयन्ति । अतः एते शब्दाः अजयस्य विशेषणानि ।

यः शब्दः नामपदस्य विषये अधिकं कथयति, तद् विशेषणम् । यस्य विषये ज्ञापनं भवति, सः विशेष्यः ।

| | | |
|---|---|---|
| नूतनः ग्रन्थः। | नूतना कविता। | नूतनं काव्यम् । |
| कीदृशः ग्रन्थः ? | कीदृशी कविता ? | कीदृशं काव्यम् ? |
| नूतनः ग्रन्थः । | नूतना कविता । | नूतनं काव्यम् । |

**अत्र विशेष्यस्य यद् लिङ्गम् अस्ति, तदेव विशेषणस्य लिङ्गं वर्तते ।**

| | |
|---|---|
| नूतनौ ग्रन्थौ । | नूतनाः ग्रन्थाः । |
| नूतने कविते । | नूतनाः कविताः । |
| नूतने काव्ये । | नूतनानि काव्यानि । |

**अत्र विशेष्यस्य यद् वचनम् अस्ति, तदेव विशेषणस्य वचनं दृश्यते ।**

नूतनस्य ग्रन्थस्य । नूतनात् ग्रन्थात् । नूतनेषु ग्रन्थेषु ।
नूतनायां कवितायाम् । नूतनया कवितया । नूतनायै कवितायै ।
नूतनेन काव्येन । नूतनाभ्यां काव्याभ्याम् । नूतनयोः काव्ययोः ।

**एतेषु उदाहरणेषु विशेष्यस्य या विभक्तिः, सा एव विभक्तिः विशेषणस्य अपि वर्तते ।**

**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य । तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ॥**

## भाषाभ्यासः

अधोनिर्दिष्टानि विशेषण-विशेष्य-शब्दयुग्मानि चिनुत ।

| | | | |
|---|---|---|---|
| सुन्दरी | आचार्यौ | श्वेतौ | छात्राः |
| सूत्रम् | आवश्यकः | कुसुमम् | माला |
| नेत्रे | पूज्यौ | कृतज्ञाः | आहारः |
| दीर्घम् | कृष्णे | कोमलम् | बकौ |